विजयेश्वर
नित्य नियम विधि

With Compliments
from,
Bandhana Cel — Jyotki

2-11-V

ॐ

विजयेश्वर

नित्य नियम विधि

Zeashta Devi Prabandak Committee (Regd.)
KRISHENJOO RAZDZN
LIBRARY
Section Religious Hindi
S.No. 190 (RH 23)
Zeathyar, Srinagar

संग्रहीत कर्ता
ओंकार नाथ शास्त्री

मैं उन समस्त मित्रों, सहयोगियों के प्रति
आभार व्यक्त करता हूँ जिन्होंने
मेरा उत्साह बढ़ाया और मुझे
इस शुभ कार्य के लिये
प्रेरित किया।

ओंकार नाथ शास्त्री

मूल्य : 60 रु

प्रकाशक :
विजयेश्वर पंचांग कार्यालय
अजीत कॉलोनी, गोल गुजराल, जम्मू
फोन : 2555607

सम्पादकीय

शास्त्रानुसार प्रत्येक मनुष्य पर तीन प्रकार के ऋण होते हैं देव ऋण - ऋषि ऋण और पितृ ऋण। नित्य कर्म करने से मनुष्य तीनों प्रकार के ऋणों से मुक्त हो जाता है ***"यत्कृत्वा नृण्यमाप्नोति दैवात् पैत्र्याच्च मानुषात्"*** अथार्त जो व्यक्ति भक्ति तथा श्रद्धा पूर्वक जीवन पर्यन्त प्रतिदिन नित्य कर्म, स्नान, सन्ध्या, जप इत्यादि करता है उसे परमानन्द की अनुभूति होती है तथा उस का जीवन सफल हो जाता है तथा वह इन तीन ऋणों से मुक्त हो जाता है। कवि सम्राट कवि कालिदास ने भी कहा है '**स्तोत्रं कस्ये न तुष्टये**' अर्थात् संसार में ऐसा कोई भी प्राणी नहीं है जो स्तुति पाठ, नित्यकर्म से शुभ फल प्राप्त करता नहीं है। स्तोत्रों को यदि देखा जाये तो हज़ारों की संख्या में स्तोत्र हैं परन्तु समयानुसर पूरी स्थिति को ध्यान में रखते हुए मैंने वही स्तोत्र तथा पाठ इत्यादि इस संग्रह में रखे हैं जो एक व्यक्ति को समकालीन जीवन के अनुरूप हैं तथा वह स्तोत्र फिर से जीवित करने का प्रयास किया है जो मृतप्राय हैं तथा जिन की प्रथा कश्मीरी समाज में अधिक थी जैसे *आदित्य हृदय, गणेशस्तवराज, मुकुन्दमाला* इत्यादि। उन तीनों ऋणों को चुकाने के निमित यह '***विजयेश्वर नित्य नियम विधि***' जनता की कामनाओं के अनुरूप संगृहीत करके प्रस्तुत कर रहा हूँ। मैंने एक निश्चित लक्ष्य और उद्देश्य से प्ररित होकर यह संग्रह कार्य किया है। मुझे पूरी आशा है कि '***विजयेश्वर नित्य नियम विधि***' समस्त जनता के लिये उपयोगी तथा लाभ प्रद रहेगी।

ओंकार नाथ शास्त्री

सम्पादक

विजयेश्वर तथा रणवीरेश्वर पंचाङ्ग

जम्मू - 2555607

कश्मीरी पण्डितों की सांस्कृतिक विरासत के अनमोल रत्न स्वर्गीय ज्योतिषी प्रेम नाथ शास्त्री के सुपुत्र ज्योतिषी ओ३मकार नाथ शास्त्री अपनी वंश परम्परा को जीवित रखने में आज महत्त्वपूर्ण भूमिका निबाह रहे हैं। धर्म, संस्कृति का अत्यन्त महत्त्वपूर्ण अंग है। वस्तुतः यह आधार भूमि है जिस पर संस्कृति का विविध आयामी भवन अपने पूरे वैभव के साथ खड़ा रहकर प्रतिष्ठा पूर्वक रास्ट्र गौरव का प्रतीक बन जाता है। धर्म यदि प्रकाश स्तम्भ है तो संस्कृति उस की पहचान है। विजयेश्वर कार्यालय ने पिछले पचास वर्षों से हिन्दू धर्म एवं हिन्दुत्व की पहचान को सुरक्षित रखने के लिये जो योग दान दिया है उस का अत्यन्त भव्य इतिहास है और समस्त हिन्दू समाज स्वर्गीय ज्योतिषी आफ़ताभ राम शर्मा के परिवार का ऋणी है।

विविध धार्मिक उत्सवों पर की जाने वाली पूजा पाठ विधि आज न केवल पुस्तक रूप में अपितु कैसटों में रिकार्डिड उपलब्ध है। चाहे वह शिवरात्रिपूजा है अथवा जन्मदिन पूजा, गृहप्रवेश पूजा है अथवा भवन शिल्यान्यास पूजा 'पन'-पूजा अथवा नवदुर्गा पूजा किसी भी प्रकार के धार्मिक उत्सव को विधि पूर्वक मनाने का विधान लिखित रूप में प्रस्तुत करने का श्रेय स्वर्गीय प्रेमनाथ शास्त्री तथा उन के योग्य सन्तनों को जाता है। गतवर्ष मृत व्यक्ति के दसवें, ग्यारहवें तथा बारहवें दिन की क्रिया-पूजा-विधि तथा श्राद्ध करने की विधि को लेकर भी ***"विजयेश्वर पंचांग कार्यालय"*** से पुस्तकें प्रकाश में आई। स्वर्गीय प्रेमनाथ शास्त्री ने सम्पूर्ण श्रीमद् भगवद्गीता को कैसटों में अपनी मधुर प्रभावशाली वाणी में रिकार्ड किया है। कैसटों के ये सेट आज न केवल भारत में अपितु विदेशों में भी पर्याप्त लोकप्रिय हुए हैं।

"विजयेश्वर पंचांग" का अपना भव्य इतिहास है। यह वास्तव में प्रत्येक हिन्दू के लिये मार्ग दर्शिका है।

पण्डित प्रेम नाथ शास्त्री के वरिष्ठ पुत्र ज्योतिषी ओ३मकार नाथ शास्त्री मर्यादा पूर्वक अपनी वंश परम्परा को आगे चला

रहे हैं। नव-प्रकाशन की सूची में ***"विजयेश्वर नित्य नियम विधि"*** एक महत्त्वपूर्ण उपलब्धि सिद्ध होगी। इस पुस्तक में कुछ ऐसी विशिष्ट पाठ-विधियाँ सविस्तार शामिल की गई हैं जो समय गुज़रने के साथ साथ अप्रचलित हो चुकी थीं। यदि ज्योतिषी जी यह प्रयास न करते तो कुछ ही वर्षों में यह अनमोल पाठ विधियाँ सदा के लिये नष्ट हो जाती। अतः इस दृष्टि से उन का यह प्रयास प्रशंसनीय है।

इस में सन्देह नहीं कि ज्योतिषी ओ३मकार नाथ जी एक सज्जन दिव्य पुरुष हैं। अत्यंत नम्र स्वभाव के ज्ञानी, महा पण्डित, लोक हितैषी, दृढ़-संकल्पी एवं परोपकारी जातिबन्धु तथा कश्मीरी पण्डित समाज के भविष्य की सुखद आशा हैं। हमारी सांस्कृतिक धार्मिक और सामाजिक मान्यताओं, परम्पराओं एवं दृढ़ विश्वासों को इन की सतर्क लेखनी से बल मिलेगा इस में कोई सन्देह नहीं।

मुझे पूरा विश्वास है कि समस्त समाज के द्वारा प्रस्तुत पाठ विधि पुस्तक ***"विजयेश्वर नित्य नियम विधि"*** का भी सहर्ष और श्रद्धा पूर्वक सम्मान होगा और जाति के लिये यह अत्यन्त उपयोगी सिद्ध होगी। पुस्तक के मूल पाठ को देखकर मुझे लगा कि निकट भविष्य में यह पुस्तक एक बहुमूल्य संदर्भ ग्रन्थ सिद्ध होगां कश्मीर के सांस्कृतिक इतिहास को जानने के हेतु तथा अपनी मूलभूत परम्परा से परिचित होने के लिये निस्सन्देह इस रचना का अपना विशिष्ट महत्त्व है।

31 दिसम्बर, 2003
जम्मू यात्री भवन
हरिद्वार

प्रोफ़ेसर (डॉ०) भूषण लाल कौल
डी० लिट्
भूतपूर्व अध्यक्ष एवं आचार्य स्नातकोत्तर
हिन्दी विभाग, कश्मीर विश्वविद्यालय
श्रीनगर, कश्मीर

हमारे प्रकाशन

1. कर्म काण्डदीपक (हिन्दी उर्दू)
   जिसमें धूप-दीप, विष्णु पूजन, प्रेप्युन, शिव पूजा, दिवचक्षीर पूजा, गृह प्रवेश पूजा, दीपमाला पूजा, श्राद्ध संकल्प विधि, पन्न पूजा, रुद्र मन्त्र, चमानु वाक्य।
2. पंचस्तवी (हिन्दी उर्दू में) अर्थ तथा व्याख्या सहित।
3. भवानी सहस्रनाम।
4. महिम्नस्तोत्र
5. बहुरूप गर्भ
6. शिव रात्रि पूजा (हिन्दी उर्दू)
7. सहस्रनामावली : शिव, विष्णु, गणेश, सूर्य, भवानी, शारिका, ज्वाला, महाराज्ञा शारदा और उमा सहस्रनाम
8. राम गीता (हिन्दी उर्दू में)
9. श्रीमत् भगवत् गीतां (उर्दू में)
10. शारदा प्राईमर
11. विजयेश्वर नित्य नियम विधि
12. नवग्रह पूजा पुस्तक।
13. श्राद्ध पद्धति पुस्तक।
14. दसवें, ग्यारहवें, बारहवें दिन की किताब।

विजयेश्वर कैसट्स

"प्रेम नाथ शास्त्री" की वाणी से

(1) गीता प्रवचन (11 कैसटों में), (2) लल्ल वाक्य (7 कैसटों में), (3) महिम्नापार (3 कैसटों में), (4) जगद्धरभट्ट के विलाप, (5) कर्म भूमिकाय दिजि धर्मुक बल, (6) राम गीता, (7) अन्तिम संस्कार विधि, (8) शिव रात्रि पूजा, (9) भवानी सहस्रनाम, (10) नित्य नियम विधि, (11) पंचस्तवी, (12) भगवत् गीता (पाठ रूप में), (13) दूर्गा सप्तशती, (14) पौष पूजा तथा लग्न संस्कार। (15) श्राद्ध, (16) दसवां, ग्यारहवां, बारहवां दिन, (17) नवग्रह पूजा, (18) जन्मदिन पजा विधि।

विषय सूची

नित्य नियम	1
श्री गणपति स्तोत्रम्	4
गणेश स्तुतिः (काश्मीरी)	6
गणेश स्तुति	7
गणेश कवचम्	8
गणेशस्तवराज	10
गणेशस्तोत्रम्	25
आरती गणेश जी	31
शंकर पूजन	32
अभिनगुप्त कृत शिवस्तुतिः	33
शिव संकल्प	35
शिवाष्टकम्	36
शंकर प्रार्थना	38
लिंगाष्टकम्	39
शिवोऽहं शिवोऽहं	40
शिव पंचाक्षरस्तोत्रम्	41
शिव षडक्षरस्तोत्रम्	42
श्री रुद्राष्टकम्	43
शिव स्तुतिः	45
शिव चामर स्तुति	45
शिवाय नमः ओं (काश्मीरी)	46
भवसर कुस तरि (काश्मीरी)	48
तेरे पूजन को भगवान्	50
श्री शिव प्रातः स्मरणस्तेत्रम्	51
शिव मानस पूजा	51
शम्भु स्तुतिः	52
वन्दे शिवं शंकरम्	54
शिवस्तोत्रम्	56
उत्पलदेव कृतं संगृहस्तोत्रम्	57
पं० शिवकौल कृत शिवस्तुतिः	61
शिवापराध क्षमापनास्तोत्रम्	64
श्री आदित्य हृदयस्तोत्रम्	66
श्री मह्मिनस्तोत्रम्	70
आरती शंकर जी	75
शिव जी की आरती	77
विष्णु प्रार्थना	78
विष्णु स्तुतिः	79
कृष्णं वन्दे जगत् गुरुम्	80
अष्टादश श्लोकी गीता	82
सप्तश्लोकी गीता	83
वन्दे महापुरुष ते चरणारविन्दम्	84
प्रातः स्मरण मंगल स्तोत्रम्	86
अच्युताष्टकम्	87

गोविन्दं भज गोविन्दं 89
गोविन्दाष्टकम् 93
श्री राम स्तुति 95
श्री हनुमान चालीसा 96
हनुमानाष्टकम् 99
श्री हनुमन जी की आरती 101
श्री राम वन्दना 102
श्री राम स्तुति 102
श्री रामावतार 103
श्री राम चन्द्र स्तुति 104
मधुराष्टकम् 105
श्री राम रक्षास्तोत्रम् 106
गौरी स्तुतिः 110
देवी सुक्तम् 112
दुर्गा सिद्ध मन्त्र स्तोत्रम् 115
सप्त श्लोकी दुर्गा 116
गायत्री चालीसा 117
दुर्गा स्तुतिः 120
सरस्वती वन्दना 121
अपराध क्षमा स्तोत्रम् 122
आरती लक्ष्मी जी 124
गंगा मां 125
गुरुस्तुतिः 126
नवग्रह पीडाहरस्तोत्रम् 128
इन्द्राक्षी 129
आरती 130
देवी स्तुतिः 132
भवान्यष्टकम् 134
प्रातः स्मरणीय स्तोत्रम् 135
पुरुष सूक्तम् 143
सूर्याष्टकम् 145
शान्ति पाठ 145
ब्राह्मी विद्या 147
सन्ध्या 149
मुकुन्दमाला स्तुतिः 154
श्री राज्ञा स्तुतिः 161
श्री ज्वाला मुखी स्तोत्रम् 162
श्री शारिका स्तोत्रम् 165
श्री शिव चालीसा 168
शिवस्तुति 172
शिवाष्टकम् 174
विल्वाष्टकम् 176
श्री दुर्गा चालीसा 177
श्री विंध्येश्वरी चालीसा 181
श्री विंध्येश्वरी स्तोत्र 184
श्री विंध्येश्वरी की आरती 185
श्री गणेश चालीसा 186
श्री लक्ष्मी चालीसा 191
श्री राम चालीसा 195
श्री कृष्ण चालीसा 199
श्री सरस्वती चालीसा 203
श्री काली चालीसा 207
श्री पार्वती चालीसा 211
श्री वैष्णो चालीसा 214
श्री गायत्री चालीसा 218
श्री अन्नपूर्णा चालीसा 222
श्री सूर्य चालीसा 226
श्री शनि चालीसा 230
नव ग्रह चालीसा 234

नित्य नियम

प्रातः काल ब्राह्मी मुहूर्त में नींद से उठते ही, दोनों हाथों की हथेलियों को देखते हुये पढ़ें:-

कराग्रे वसते लक्ष्मीः कर मध्ये सरस्वती ।
करमूले स्थितो ब्रह्मा प्रभाते कर दर्शनम्।।

विस्तरे से उठने पर यह पढ़ें:-

समुद्र वसने देवि पर्वतस्तनं मण्डिते ।
विष्णु पत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे।।

शौच आदि से निवृत होकर बायां पैर धोते हुए पढ़ें:- नमोस्त्व नन्ताय सहस्र मूर्तये सहस्र पादाक्षि-शिरोरु बाहवे। सहस्र-नाम्ने पुरुषाय शाश्वते, सहस्र कोटी - युगधारिणे नमः।

दायां पैर धोते हुए पढ़ें:- ॐ नमः कमलनाभाय-नमस्ते जल शायिने। नमस्ते केशवानन्त-वासुदेव नमोस्तुते।

मुंह धोते हुए पढ़ें:- गंगा, प्रयाग, गयनै मिष पुष्करादि-तीर्थानि, यानि भुवि सन्ति-हरिप्रसादात् आयान्तु तानि कर पद्म पुटे मदीये प्रक्षालयन्तु वदनस्य निशा कलंकम्। तीर्थे स्नेयं तीर्थमेव समानानां भवति मा नः शंस्यो अरुरुषो धूर्ति प्राणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते।

मुंह धोकर यज्ञोपवीत धोते हुए तीन बार पढ़ें:- ॐ गायत्र्यै नमः। ॐ भूर्भुवः स्वः तत्सवितुर्-वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।।

यज्ञोपवीत गले में फिर से धरण करते हुए पढें:- यज्ञोपवीतं परमं पवित्रं प्रजापते र्यत् सहजं पुरस्तात्-आयुष्यम्-अग्र्यं प्रतिमुंच शुभ्रं, यज्ञोपवीतं बलम्-अस्तु तेजः। यज्ञोपवीतम् - असि यज्ञस्यत्वा - उपवीतेन - उपनह्यामि।।

स्नान इत्यादि करके पूर्व दिशा की ओर मुंह करके धूप, दीप जला कर शुद्ध आसन पर बैठ कर आदि देव-भगवान् गणेश का ध्यान करते हुए पढें:-

प्रातः-स्मरामि-गणनाथम्-अनाथ बन्धुं,
सिन्दूर-पूरपरि-शोभित-गण्ड-युग्मम्।
उद्दण्ड-विघ्न-परि-खण्डन-चण्ड-दण्डम्,
आखण्ड-लादि-सुरनायक-वृन्द-वन्द्यम्।।
प्रातः-स्मरामि-भवभीति-महार्ति-नाशं,
नारायणं-गरुड-वाहनम्-अब्जनाभम्।
ग्राहाभिभूत-वर-वारण-मुक्ति-हेतुं,
चक्रायुधं- तरुण-वारिज-पत्र-नेत्रम्।।
प्रातः स्मरामि भव-भीतिहरं-सुरेशं,
गङ्गाधारं वृषभ-वाहनम्-अम्बिकेशम्।
खट्वाङ्गग-शूल-वरदा-भय-हस्तम्-ईशं,
संसार-रोगहरम्-औषधम्-अद्वितीयम्।।
ब्रह्मा-मुरारिः-त्रिपुरान्तकारी,
भानुः-शशि-भूमिसुतो-बुधश्च।
गुरुश्च-शुक्रः-शनि-राहु-केतवः,

कुर्वन्तु-सर्वे-मम-सु प्रभातम्।।
भृगुः वसिंष्ठः क्रतुः, अङ्गिगराश्च,
मनुः पुलस्त्यः पुलहश्च गौतमः।
रैभ्यो मरीचिः-च्यवनश्च दक्षः,
कुर्वन्तु सर्वे मम सुप्रभातम्।।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतु-र्भुजम्,
प्रसन्न वदनं ध्याये, सर्वविघ्नोप-शान्तये।
अभिप्रीतार्थ - सिद्ध्यर्थं पूजितो यः सुरैर्-अपि,
सर्वविघ्नच्छिदे तस्मै, गणा-धिपतये नमः।
बिभ्रत्-दक्षिण-हस्तपद्म-युगले, दन्ताक्षसूत्रे शुभे,
वामे मोदक-पूर्णपात्र, परशु नागो-पवीति त्रिदृक्।
श्रीमान्-सिंहयुगासनः श्रुतियुगे,
शंखौ वहन् मौलिमान्,
दिश्यात् - ईश्वरपुत्र-ईश भगवान्
लम्बोदरः- शर्म-नः।।
सिन्दूर-कुंकुम-हुताशन-विद्रुमार्क,
रक्ताब्ज-दाडिम-निभाय-चतु-र्भुजाय।
हेरम्ब-भैरव गणेश्वर-नायकाय,
सर्वार्थसिद्धि-फलदाय गणेश्वराय।।
मुख्यं द्वादश-नामानि गणेशस्य महात्मनः। यः पठेत्-तु शिवोक्तानि स लभेत्- सिद्धिम्-उत्तमाम्। प्रथमं वक्रतुण्डं तु, चैकदन्तं द्वितीयकम्, तृतीयं

यज्ञोपवीत गले में फिर से धरण करते हुए पढ़ें:- यज्ञोपवीतं परमं पवित्रं प्रजापते र्यत् सहजं पुरस्तात्-आयुष्यम्-अग्ग्र्यं प्रतिमुंच शुभ्रं, यज्ञोपवीतं बलम्-अस्तु तेजः। यज्ञोपवीतम् - असि यज्ञस्यत्वा - उपवीतेन - उपनह्यामि।।

स्नान इत्यादि करके पूर्व दिशा की ओर मुंह करके धूप, दीप जला कर शुद्ध आसन पर बैठ कर आदि देव-भगवान् गणेश का ध्यान करते हुए पढ़ें:-

प्रातः-स्मरामि-गणनाथम्-अनाथ बन्धुं,
सिन्दूर-पूरपरि-शोभित-गण्ड-युग्मम्।
उद्दण्ड-विघ्न-परि-खण्डन-चण्ड-दण्डम्,
आखण्ड-लादि-सुरनायक-वृन्द-वन्द्यम्।।
प्रातः-स्मरामि-भवभीति-महार्ति-नाशं,
नारायणं-गरुड-वाहनम्-अब्जनाभम्।
ग्राहाभिभूत-वर-वारण-मुक्ति-हेतुं,
चक्रायुधं- तरुण-वारिज-पत्र-नेत्रम्।।
प्रातः स्मरामि भव-भीतिहरं-सुरेशं,
गङ्गाधारं वृषभ-वाहनम्-अम्बिकेशम्।
खट्वाङ्ग-शूल-वरदा-भय-हस्तम्-ईशं,
संसार-रोगहरम्-औषधम्-अद्वितीयम्।।
ब्रह्मा-मुरारिः-त्रिपुरान्तकारी,
भानुः-शशि-भूमिसुतो-बुधश्च।
गुरुश्च-शुक्रः-शनि-राहु-केतवः,

कुर्वन्तु-सर्वे-मम-सु प्रभातम्।।

भृगुः वसिंष्ठः क्रतुः, अङ्गिगराश्च,

मनुः पुलस्त्यः पुलहश्च गौतमः।

रैभ्यो मरीचिः-च्यवनश्च दक्षः,

कुर्वन्तु सर्वे मम सुप्रभातम्।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतु-र्भुजम्,

प्रसन्न वदनं ध्याये, सर्वविघ्नोप-शान्तये।

अभिप्रीतार्थ - सिद्ध्यर्थं पूजितो यः सुरैर्-अपि,

सर्वविघ्नच्छिदे तस्मै, गणा-धिपतये नमः।

बिभ्रत्-दक्षिण-हस्तपद्म-युगले, दन्ताक्षसूत्रे शुभे,

वामे मोदक-पूर्णपात्र, परशु नागो-पवीति त्रिदृक्।

श्रीमान्-सिंहयुगासनः श्रुतियुगे,

शंखौ वहन् मौलिमान्,

दिश्यात् - ईश्वरपुत्र-ईश भगवान्

लम्बोदरः- शर्म-नः।।

सिन्दूर-कुंकुम-हुताशन-विद्रुमार्क,

रक्ताब्ज-दाडिम-निभाय-चतु-र्भुजाय।

हेरम्ब-भैरव गणेश्वर-नायकाय,

सर्वार्थसिद्धि-फलदाय गणेश्वराय।।

मुख्यं द्वादश-नामानि गणेशस्य महात्मनः। यः पठेत्-तु शिवोक्तानि स लभेत्- सिद्धिम्-उत्तमाम्। प्रथमं वक्रतुण्डं तु, चैकदन्तं द्वितीयकम्, तृतीयं

कृष्णपिंगं तु, चतुर्थं च कपर्दिनम्, लम्बोदरं पंचमं तु, षष्ठं विकटम्-एव च, सप्तमं विघ्नराजेन्द्रं, धूम्रवर्णं तथाष्टमं। नवमं भालचन्द्रं तु, दशमं तु विनायकम्, एकादशं गणपतिं, द्वादशं मन्त्र - नायकम्। पठते शृणुते यस्तु, गणेश - स्तवम् - उत्तमं, भार्यार्थी लभते भार्या, धनार्थी विपुलं धनम्। पुत्रार्थी लभते पुत्रम्, मोक्षार्थी परमं पदम्, इच्छाकामं तु कामार्थी, धर्मार्थी धर्मम्-अक्षयम्।। सुमुखोश्चैक-दन्तश्च, कपिलो गजकर्णकः, लम्बोदरश्च विकटो, विघ्नराजो गणाधिपः। धूम्र-केतु-गणाध्यक्षो, भालचन्द्रो गजाननः, द्वादशै-स्तानि-नामानि, गणेशस्य महात्मनः, य पठेत्-शृणुयात्-वापि स लभेत् सिद्धिम्-उत्तमाम्। विद्यारम्भे, विवाहे च, प्रवेशे निर्गमे तथा संग्रामे संकटे चैव, विघ्नस्तस्य न जायते।।

श्री गणपति स्तोत्रम्

जेतुं यस्त्रिपुरं हरेण हरिणा व्याजाद्बलिं बध्नता
स्त्रष्टुं वारिभवोद्भवेन भुवनं शेषेण धर्तुं धराम्।
पार्वत्या महिषासुर प्रमथने सिद्धाधिपैः सिद्धये।
ध्यातः पंचशरेण विश्वजितये पायात्स नागाननः।।
विघ्न ध्वान्त निवारर्णै कतरणिर्विघ्नाट वीह व्यवाड्
विघ्न व्यालकुलाभिमान गरुडो विघ्नेभ पंचाननः।

विघ्नोत्तुङ्ग गिरि प्रभेदनपवि र्विघ्नाम्बु धेर्वाडवो
विघ्नाघौघ घनप्रचण्ड, पवनो विघ्नेश्वरः पातु नः।।
खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं,
प्रस्यन्दन-मदगन्धलुब्ध-मधुप-व्यालोल-गण्डस्थलम्।
दन्ताघात विदारितारि रुधिरैः सिन्दूर शोभाकरं,
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम्।।
श्वेताङ्ग श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः,
क्षीराब्धौ रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम्।
दोर्भिः पाशाङ्कुशब्जा भयवरमनसं चन्द्रमौलिं त्रिनेत्रं,
ध्ययायत्-शान्त्यर्थमीशं गणपतिम्-अमलं श्रीसमेतं प्रसन्नम्।।
आवाहये तं गणराजदेवं-रक्तोत्पलाभासम् अशेषवन्द्यम्।,
विघ्नान्तकं विघ्नहरं गणेशं-भजामि रौद्रं सहितं च सिद्ध्या।।
यं ब्रह्म वेदान्तविदो वदन्ति-परं प्रधानं पुरुषं तथान्ये।
विश्वोद्गतेः कारणमीश्वरं वा-तस्मै नमो विघ्नविनाशनाय।।
विघ्नेश वीर्याणि विचित्रकाणि-वन्दीजनैमार्गधकैः स्मृतानि।
श्रुत्वा समुत्तिष्ठ गजानन त्वं-ब्राह्मे जगन्मङ्गलकं कुरुष्व।।
गणेश हेरम्ब गजाननेति-महोदर स्वानुभवप्रकाशिन्।
वरिष्ठ सिद्धिप्रिय बुद्धिनाथ-वदन्त एवं त्यजत प्रभीतीः।।
अनेकविघ्नान्तक वक्रतुण्ड-स्वसंज्ञवासिंश्च चतुर्भुजेति।
कवीश देवान्तक नाशकारिन्-वदन्त एवं त्यजत प्रभीतीः।।
अनन्तचित्-रूपमयं गणेशं-ह्यभेदभेदादि विहीनम्- आद्यम्।
हृदि प्रकाशस्य धरं स्वधीस्थं-तमेकदन्तं शरणं व्रजामः।।
विश्वादिभूतं हृदि योगिनां वै-प्रत्यक्षरूपेण विभान्तमेकम्।
सदा निरालम्ब समाधिगम्य-तमेकदन्तं शरणं व्रजामः।।
यदीयवीर्येण समर्थभूता-माया तया संरचितं च विश्वम्।

नागात्मकं ह्यात्मतया प्रतीतं-तमेकदन्तं शरणं व्रजामः।।
सर्वान्तरे संस्थितम्-एक मूढं-यदाज्ञया सर्वमिदं विभाति।
अनन्तरूपं हृदि बोधकं वै-तमेकदन्तं शरणं व्रजामः।।
यं योगिनो योगबलेन साध्यं-कुर्वन्ति तं कः स्तवनेन नौति।
अतः प्रणामेन सुसिद्धिदोऽस्तु-तमेकदन्तं शरणं व्रजामः।।
देवेन्द्र मौलिमन्दार मकरन्द कणारुणाः,
विघ्नान् हरन्तु हेरम्ब चरणाम्बु जरेणवः।।
एकदन्तं महाकायं लम्बोदर गजाननम्।,
विघ्ननाशकरं देवं हेरम्बं प्रणमाम्यहम्।।
यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत्।,
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर।।

गणेश स्तुतिः

आसय शरण करतम क्षमा, ओं श्री गणेशाये नमः।
गणपत गणेश्वर हे प्रभो, कलिराज़ राज़न हुन्द विभो।।
पजि़ लोलु पादन तल नमः, ओं श्री गणेशाये नमः।
गुडनी च्यय छुय आधिकार, कलिकालकुय चुय ताजदार।
पजि़ लोल पादन तल प्यमा, ओं श्री गणेशाये नमः।
मूषक च़्यय वाहन शूभवुन, त्रन लूकनय मंज फेरवुन,
सहायक म्य रोज़तम हर दमः, ओं श्री गणेशाये नमः।
यज्ञस ज़पस व्यवहारसय, गुडु छिय सुरान प्रथकारसय,
कारस अनान छुख चय जमः, ओं श्री गणेशाये नमः।
सुन्दर लम्बोदर एक दन्त, स्मरन चाऩ वंतिन म्ये अन्द।
रति वेल, सुन्दर छुम समः, ओं श्री गणेशाये नमः।
स्मरन यि चोनी यिम करान, भवुसागरस अपोर तरान,
रट्अ सानि नावे चुय नमा, ओं श्री गणेशाये नमः।

स्मरन यि चानी भक्ति जन, पूरण गछान तम्यसुन्द छु प्रन,
चरणोदकुक अमृत चमा, ओं श्री गणेशाये नमः।
ज़गतुक महेश्वर च्य पिता, सति रूप सीति धर्मुच सत्ता,
माता च़्य गौरी श्री वुमा, ओं श्री गणेशाये नमः।
बाह नाव सुन्दर शूभुवुज, स्वर्गस गछान तिम बोलुवुज,
पूरण करुम पूरण तमा, ओं श्री गणेशाये नमः।
आमुत भक्त च़्येय छुय शरण, प्योमुत खोरन तल छुय परण,
वर दिय कास्तम चुय गमा, ओं श्री गणेशाये नमः।
सुबह प्यठ भखत, छिय लारान, प्रेम पोश ह्यय छिय प्रारान,
छुयख च्यानि पूजि लागनुक तमा, ओं श्री गणेशाये नमः।
गणिशबल प्यठ आख चलिथय अंग अंग स्यंदरा मलिथय,
गोअड़ बोअज म्यन प्रार्थना, ओं श्री गणेशाये नमः।

गणेश स्तुति

हेमजा सुतं भजे गणेशं ईश नन्दनम्।
एकदन्त वक्र तुण्ड नाग यज्ञ सूत्रकम्।।

रक्त गात्र धूम्र नेत्र शुक्ल वस्त्र मण्डितम्।
कल्पवृक्ष भक्त रक्ष नमोस्तुते गजाननम्।।

पाशपाणि चक्रपाणि मूषकाधि रोहिणम्।
अग्निकोटि सूर्य ज्योति वज्रकोटि पर्वतम्।।

चित्रमाल भक्तिज़ाल भालचन्द्र शोभितम्।
कल्पवृक्ष भक्तरक्ष नमोस्तुतेगजाननम्।।

विश्ववीर्य विश्वसूर्य विश्वकर्म निर्मलम्।

विश्वहर्ता विश्वकर्ता यत्र तत्र पूजितम्।।

चतुर्मुखं चतुर्भुजं सेवितं चतुंर्युगम्।
कल्पवृक्ष भक्तरक्ष नमोस्तुतेगजाननम्।।

भूत भव्य हव्य कव्य भर्गो भार्गव वन्दितम्।
देव वह्नि काल जाल लोकपाल वन्दितम्।।

पूर्ण ब्रह्म सूर्यवर्ण पुरुषं पुरान्तकम्।
कल्पवृक्ष भक्तरक्ष नमोस्तुतेगजाननम्।।

ऋद्धि बुद्धि अष्टसिद्धि नव निधान दायकम्।
यज्ञकर्म सर्वधर्म सर्व वर्ण अर्चितम्।।

भूतधूत दुष्ट मुष्ट दान्वै र्सदार्चितम्।
कल्पवृक्ष भक्तरक्ष नमोस्तुतेगजाननम्।।

हर्ष रूप वर्ष रूप पुरुष रूप वन्दितम्।
शोर्प कर्ण रक्त वर्ण रक्त चन्दन लेपितम्।।

योग इष्ट योग सृष्ट योग दृष्टि दायकम्।
कल्पवृक्ष भक्तरक्ष नमोस्तुतेगजाननम्।।

गणेशकवचम्

अस्य श्री गणेशकवचस्य भृगुऋषिः, अनुष्टुप्छन्दः, श्रीगज वदनो देवता, आत्मनो वाङ्मनः कायोपार्जितपापनिवारणार्थं, अमुककामनासिद्ध्यर्थे जपे पाठे वा विनियोगः।।

।। अथ ध्यानम्।।

गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं
बृहदुदर मशेषव्यक्तिरूपं पुराणम्।
अमरवरसुपूज्यं रक्तवर्णं सुरेशं
पशुपतिसुतमीशं विघ्नराजं नमामि।।
ॐ शिरोवत्वीशपुत्रो मे बालं पातु विनायकः।
त्रिनेत्रः पातु नेत्रे मे शूर्पकर्णस्तथा श्रुती।।
हेरंबो रक्षतु घ्राणं मुखं पातु गजाननः।
जिह्वां पातु गणेशो मे कण्ठं श्रीकण्ठवल्लभः।।
स्कन्दौ महाबलः पातु भुजौ मे पातु विघ्नहा।
करौ परशुभृत्पातु नाभिं सिन्दूरभूषितः।।
जघनं पार्वतीपुत्रस्तूरू मे पातु पाशभृत्।
जानुनी जगतां नाथो जङ्घे मूषकवाहनः।।
गुल्फौ पद्मासनः पातु पादौ दुर्दैत्यदर्पहा।
एकदन्तोऽग्रतः पातु पृष्ठं पातु गणाधिपः।।
पार्श्वौ तु मोदका हारो दिग्विदिक्षु च सिद्धिदः।
व्रजतस्तिष्ठतो वापि जाग्रतः स्वपतोपि वा।।
चतुर्थीवल्लभो देवो पातु मे भुक्तिमुक्तिदः।।
इदं पवित्रं यः स्तोत्रं चतुर्थ्यां नियतः पठेत्।
सिन्दूररक्तपुष्पैश्च दूर्वयाऽऽपूज्य विघ्नपम्।।
राजा राजसुतो वापि राजपत्नी कुलं बलम्।
तस्यावश्यं भवेद्वश्यो विघ्नराजप्रसादतः।।
समन्त्रयन्त्रं यः स्तोत्रं करे संलिख्य धारयेत्।
धनधान्य समृद्धिस्तु भवत्येव न संशयः।।
वाग्भवं कामराजस्य माया चादौ विधीयताम्।

हुंनमो वक्रतुण्डाय मध्ये यस्य जपेन्नरः।।
रसनालसत् एकाग्रं षडङ्गं रस पूर्वकम्।
हुत्वा दत्वा च विधिवन्नष्टद्रव्यं समेष्यति।।
यं यं काममभिध्याय कुरुते कर्म किञ्चन।
तं तं सर्वमवाप्नोति वक्रतुण्डप्रसादतः।।
भवेदव्याहतैश्वर्यः सः गणेशप्रसादतः।।

गणेशास्तवराजः

ॐ विघ्नेशो नः स पायात्विहृतिषु जलधिं पुष्कराग्रेण पीत्वा
यस्मिन्-उद्धृत्य हस्तं वमति तदऽखिलं दृश्यते व्योम्नि देवैः
क्वाप्यम्भः क्वापि विष्णुः क्वचन कमलभूः क्वाप्यऽनन्तः क्वच श्रीः
क्वाप्यौर्वः क्वापि शैलः क्वचन मणिगणः क्वापि नक्रादि सत्वाः।।
निर्विध्न विश्व निर्माण सिद्धये यदनुग्रहम्।
मन्ये स वक्रे धातापि तस्मै विघ्न जिते नमः।।
सर्गारम्भेऽप्यजाताय बीजरूपेण तिष्ठते।
धात्रा कृतप्रणामाय गणाधिपतये नमः।।
गणेशाय नमः प्रह्ववाञ्छिताम्बुजभानवे।
सितदंष्ट्राकुर स्फीतविघ्नौघ तिमिरेन्दवे।।
प्रणमाम्यजमीशानं योगशास्त्रविशारदम्।
निःशिषगणवृन्दस्य नायकं सुविनायकम्।।
"श्रीब्रह्मोवाच"।।
भगवन् श्रोतुम् इच्छामि विस्तरेण यथायथम्।
स्तवराजस्य माहात्म्यं स्वरूपंच विशेषतः।।

"श्रीनन्दिकश्वर उवाच"।।
स्तवराजस्य माहात्म्यं प्रवक्ष्यामि समासतः।।
शृणुष्वावहितो भूत्वा सर्व सिद्धिकरं परम्।
कर्मणा मनसा वाचा ये प्रपन्ना विनायकम्।
ते तरन्ति महाघोरं संसारं कामवर्जिताः।।
सकृच्च जप्त्वा स्तवराजमुत्तमं तरत्यशेषं भवपाशपञ्जरम्।
विमुच्यते संसृतिसागरान्नरो विभूतिमाप्नोति सुरैः सुदुर्लभाम्।।
यत्फलं लभते जप्त्वा स्वरूपं चापि यादृशम्
यः प्रातरुत्थितो विद्वान्ब्राह्मे वापि मुहूर्तके।
विषुवायनकालेषु पुण्ये वा समयान्तरे।।
सर्वदा वा जपञ्जन्तुः स्तवराजं स्तवोत्तमम्
यत्फलं लभते मर्त्यः तच्छृणुष्व चतुर्मुख।।
गङ्गाप्रवाहवत्तस्य वाग्विभूतिर्विजृम्भते।।
बृहस्पतिसमो बुद्ध्या पुरन्दरसमः श्रिया।
तेजसादित्यसङ्काशो भार्गवेण समो नये।।
धनदेन समो दाने तथा वित्तपरिग्रहे।
धर्मराजसमो न्याये शिवभक्तो मया समः।।
प्रतापे वह्निसंकाशः प्रसादे शशिना समः।
बलेन महता तुल्यो भवता ब्रह्मवर्चसे।।
सर्वतत्वार्थविज्ञाने मयापि समतां व्रजेत्।
एवमेतत्त्रिसन्ध्यं वै जपन्स्तवमनुत्तमम्।।
सर्वान्कामान्नरः प्राप्य भुक्त्वा भोगान्यथेप्सितान्।
सशरीरः सुरेन्द्रस्य पदं न्यस्यति मूर्धनि।।

प्राप्याष्टगुणमैश्वर्यं भुक्त्वा भोगान्सुपुष्कलान्।
अक्षयो वीतशोकश्च निरातङ्को निरामयः।।
जरामरणनिर्मुक्तो वेदशास्त्रार्थ कोविदः।
सिद्धचारण गन्धर्व देवविद्या धरादिभिः।।
संस्तूयमानो मुनिभिः शंस्यमानो दिनेदिने।
विचरत्यऽखिलां ल्लोका न्बन्धुवर्गैः समं नरः।।
एवं चिराय निर्वाह्य देवस्यानुचरोभवेत्।
स्तवराजं सकृज्जप्त्वा मुच्यते सर्वकिल्विषैः।।
सर्वसिद्धिम् अवाप्नोति पुनात्यासप्तमं कुलम्।
नाश्येत् विघ्न संघातांस्तेन वैनायकं स्मृतम्।।
स्तवराजमनुस्मरञ्जपन्हृदयाग्रे विलिखन्पठन्नपि।
स सुरासुर सिद्धचारणै र्मुनिभिः प्रत्यहमेव पूज्यते।
तरति च भवचक्रं सर्वमोहं निहन्ति
क्षिपति च परवादं मान्यते बन्धुवर्गैः।
अखिलमपि च लोकं क्षेमतामाशु नित्वा
व्रजति यतिभिरीड्यं शाश्वतं धाम मर्त्यः।।
यो जपति स्तवराजमशोकः क्षेमतमं पदमेति मनुष्यः।
चारणसिद्धसुरैरभिवन्द्यो याति पदं परमं स विमुक्तः।।
जपेद्यः स्तवराजाख्यमिमं प्रातःस्तवोत्तमम्।
तस्यापचारं क्षमते सर्वदैव विनायकः।।
सर्वान्निहन्ति वै विघ्नान्विपदश्च समन्ततः।
अशेषाभिर्गणाध्यक्षः सम्पद्भिरभिषिञ्चति।।
अस्य च प्रणता लक्ष्मीः कटाक्षानुविधायिनी।

किं करोमीति वै भीत्या पुरस्तादेव तिष्ठति।।
तस्मान्निः श्रेयर्स गन्तुमतिभक्त्या विचक्षणः।
स्तवराजं जपेज्जन्तुर्धर्मकामार्थ सिद्धये।।
आधि व्याध्यस्त्र शस्त्राग्नि तपः पङ्कार्णवादिषु।
भयेष्वन्येषु चाप्येतत्स्मरन्मुक्तो भवेन्नरः।।
स्तवराजं सकृज्जप्त्वा मार्गं गच्छति मानवः।
न जातु जायते तस्य चौरव्याघ्रादिभि र्भयम्।।
यथा वरिष्ठो देवानाम शेषाणां विनायकः।
तथा स्तवो वरिष्ठोयं स्तवानां शम्भुनिर्मितः।।
अवतीर्णो यदा देवो विघ्नराजो विनायकः।
तदा लोकोपकारार्थं प्रोक्तोयं शम्भुना स्वयम्।
विनायकप्रियकरो देवस्य हृदयङ्गमः।
जप्यः स्तवोयं यत्नेन धर्मकामार्थसिद्धये।।

"अस्य श्रीमहागणपति स्तवराज मंत्रस्य ईश्वर ऋषिः, नानावृत्तानि छन्दांसि विनायको देवता तत्पुरुष इति बीजं एकदन्त इति शक्तिः आत्मनो वाङ्मनः कायो पार्जित पाप निवारणार्थं धर्मार्थ कामसिध्यर्थे पाठे विनियोगः"।।

ध्यानं।।

जेतुं यस्त्रिपुरं हरेण हरिणा व्याजाद्बलेर्बन्धने
स्रष्टुं वारिरुहोद्भवेन विधिना शेषेण धर्तुंधराम्।
पार्वत्या महिषासुर प्रमथने सिद्धाधिपैर्मुक्तये
ध्यातः पञ्चशरेण लोकविजये पायात्स नागाननः।।

।।"ईश्वर उवाच"।।

ॐ कारममृतं ब्रह्म शिवमक्षरमव्ययम्।
यमामनन्ति वेदेषु तं प्रपद्ये विनायकम्।।
यतः प्रवृत्तिर्जगतां यः साक्षी हृदयस्थितः।
आधारभूतो विश्वस्य तं प्रपद्ये विनायकम्।।
यस्य प्रसादाच्छक्राद्याः प्राणन्ति निमिषन्ति च।
प्रवर्तकं तं लोकानां प्रणमामि विनायकम्।।
शिखाग्रे द्वादशाङ्गुल्ये स्थितं सूक्ष्मतनुं विभुम्।
युञ्जन्ति यं मरीच्याद्यास्तं नमामि गणाधिपम्।।
लीलया लोक रक्षार्थं द्विधाभूतो महेश्वरः।
यः स्वयं जगतः साक्षी तं वन्दे द्विरदाननम्।।
विघ्नेश्वरं विधातारं धातारं जगतामपि।
प्रणमामि गणाध्यक्षं प्रणतार्तिविनाशनम्।।
उत्सङ्गतल्पे यो देव्या भवान्याः क्रीडते विभुः।
बालो हरन्मनस्तस्यास्तं प्रपद्ये विनायकम्।।
विधाय भूषणैश्चित्रैर्वेशकर्म मनोरमम्।
यं दृष्टा पश्यतीशानी तं प्रपद्ये विनायकम्।।
लीलया यः सृजंल्लोकान्भिन्दन्नपि मुहुर्मुहुः
संक्रीडते महासत्वस्तं नतोस्मि गणाधिपम्।।
सिन्दूरितमहाकुम्भस्तुङ्गदन्तः सुभैरवः।
भिनत्ति दैत्यकरिणस्तं वन्दे द्विरदाननम्।।
यस्य मूर्तिं व्रजन्त्याशु मदामोदानुषङ्गिणः।
भ्रमरास्तीव्रसंरावास्तं नमामि विनायकम्।।

गम्भरभीमनिनदं श्रुत्वा यत् बृंहितं क्षणात्।
पतन्त्यसुरनागेन्द्रास्तं वन्दे द्विरदाननम्।।
यो भिनत्ति गिरीन्सर्वान्घोरनिर्घातभैरवैः।
रवैः सन्त्रासजननैस्तं वन्दे द्विरदाननम्।।
लीलया प्रहता येन पादाभ्यां धरणी क्षणात्।
संशीर्यते सशैलौघा तं वन्दे चण्डविक्रमम्।।
यत्करताडनै र्भिन्नमम्भः शतसहस्रधा।
विशीर्यते समुद्राणां तं नतोस्मि गणाधिपम्।।
विमुखा यत्र दृश्यंते भ्रष्टवीर्याः पदच्युताः।
निष्प्रभा विबुधाः सद्यस्तं प्रपद्ये विनायकम्।।
यत् भ्रूप्रणिहितां लक्ष्मीं लभन्ते वासवादयः।
स्वतन्त्रमेकं नेतारं विघ्नराजं नमाम्यहम्।।
यत्पादपांसुनिचयं बिभ्राणा मणिमौलिषु।
अमरा बहु मन्यन्ते तं नतोस्मि गणाधिपम्।।
वेदान्तगीतं पुरुषं वरेण्यमऽभयप्रदम्।
हिरण्मयपुरान्तःस्थं तमस्मि शरणं गतः।।
चित्सुधानन्दसन्मात्रं परानन्दस्वरूपिणम्।
निष्कलं निर्मलं साक्षाद्विनायकमुपैमि तम्।।
अनपायं च सद्भूतं भूतिदं भूतिवर्धनम्।
नमामि सत्यविज्ञानमनन्तं ब्रह्मरूपिणम्।।
अनाद्यन्तं महादेव प्रियपुत्रं मनोरमम्।
द्विपाननं विभुं साक्षादात्मानं तं नमाम्यहम्।।
विश्वामरेश्वरैर्वन्द्यमाधारं जगतामपि।

प्रणमामि गणाध्यक्षं प्रणताज्ञान मोचनम्।।
शिखाग्रे द्वादशाङ्गुल्ये स्थितं स्फटिक सन्निभम्।
गोक्षीरधवलाकारं प्रणमामि गजाननम्।।
अनाधारं नवाधारम नन्ताधार संस्थितम्।
धातारं च विधातारं तमस्मि शरणं गतः।।
अनन्तदृष्टिं लोकादिमनन्तं विद्रुमप्रभम्।।
अप्रतर्क्यमनिर्देश्यं निरालम्बं नमाम्यहम्।।
भूतालयं जगद्योनिमणी यांसमणोरपि।
स्वसंवेद्यमसंवेद्यं वेद्यावेद्यं नमाम्यहम्।।
प्रमाणप्रत्ययातीतं हंसमव्यक्तलक्षणम्।
अनाविलमनाकारं तमस्मि शरणं गतः।।
विश्वाकारमनाकारं विश्वावासमनामयम्।
सकलं निष्कलं नित्यं नित्यानित्यं नमाम्यहम्।।
संसारवैद्यं सर्वज्ञं सर्वभेषज भेषजम्।
आत्मानं सदसद्व्यक्तं धातारं प्रणमाम्यहम्।।
भ्रूमध्ये संस्थितं देवं नाभिमध्ये प्रतिष्ठितम्।
हृन्मध्ये दीपवत्संस्थं वन्दे सर्वस्य मध्यगम्।।
हृत्पुण्डरीकनिलयं सूर्यमण्डलनिष्ठितम्।
तारकान्तरसंस्थानं तारकं तं नमाम्यहम्।।
तेजस्विनं विकर्तारं सर्वकारणकारणम्।
भक्तिगम्यमहं वन्दे प्रणवप्रतिपादितम्।।
अन्तर्योगरतैर्युक्तैः कल्पितैः स्वस्तिकासनैः।
बद्धं हृत्कर्णिकामध्ये ध्यानगम्यं नमाम्यहम्।।

ध्येयं दुर्ज्ञेयमद्वैतं त्रयीसारं त्रिलोचनम्।
आत्मानं त्रिपुराराते: प्रियसूनुं नमाम्यहम्।।
स्कन्दप्रियं स्कन्दगुरुं स्कन्दस्याग्रजमेव च।
स्कन्देन सहितं शश्वन्नमामि स्कन्दवत्सलम्।।
नमस्ते विघ्नराजाय भक्तविघ्नविनाशिने।
विघ्नध्यक्षाय विघ्नानां निहन्त्रे विश्वचक्षुषे।।
विघ्नदात्रेऽप्यभक्तानां भक्तानां विघ्नहारिणे।
विघ्नेश्वराय वीराय विघ्नेशाय नमोनमः।।
कुलाद्रिमेरुः कैलासशिखराणां प्रभेदिने।
दन्तभिन्ना भ्रमालाय करिराजाय ते नमः।।
किरीटिने कुण्डलिने मालिने हारिणे तथा।
नमो मौञ्जी सनाथाय जटिने ब्रह्मचारिणे।।
डिण्डिमुण्डाय चण्डाय कमण्डलुधराय च।
दण्डिने चैव मुण्डाय नमोऽध्ययनशीलिने।।
वेदाध्ययनयुक्ताय सामगानपराय च।
त्र्यक्षाय च वरिष्ठाय नमश्चन्द्रशिखण्डिने।।
कपर्दिने करालाय शंकर प्रियसूनवे।
सुताय हैमवत्याश्च हर्त्रे च सुर विद्विषाम्।।
ऐरावणादिभि र्दिव्यैदिग्गजैः संस्तुताय च।
स्वबृंहितपरित्रस्तै र्नमस्ते मुक्तिहेतवे।।
कूष्माण्डगणनाथाय गणानां पतये नमः।
वज्रिणाराधितायैव वज्रिवज्रनिवारिणे।।
पूष्णो दन्तभिदे साक्षान्महतां भीष्णाय च।

ब्रह्मणश्च शिरोहर्त्रे विवस्वद्बन्धनाय च।।
अग्नेश्चैव सरस्वत्या इन्द्रस्य च बलच्छिदे।
भैरवाय सुभीमाय भयानकरवाय च।।
बिभीषणाय भीष्माय नागाभरणधारिणे।
प्रमत्ताय प्रचण्डाय वक्रतुण्डाय ते नमः।
हेरम्बाय नमस्तुभ्यं प्रलम्बजठराय च।
आखुवाहाय देवाय चैकदन्ताय ते नमः।।
शूर्पकर्णाय शूराय परश्वधधराय च।
सृणिहस्ताय धीराय नमः पाशासिपाणये।।
धारणाय नमस्तुभ्यं धारणाभिरताय च।
धारणाभ्यासयुक्तानां पुरस्तात्संस्तुताय च।।
प्रत्याहाराय वै तुभ्यं प्रत्याहाररताय च।
प्रत्याहाररतानां च प्रत्याहारस्थितात्मने।।
विघ्नाध्यक्षाय दक्षाय लोकाध्यक्षाय धीमते।
भूताध्यक्षाय भव्याय गणाध्यक्षाय ते नमः।।
योगपीठान्तरस्थाय योगिने योगधारिणे।
योगिनां हृदिसंस्थाय योगगम्याय ते नमः।।
ध्यानाय ध्यानगम्याय शिवध्यानपराय च।
ध्येयानामपि ध्येयाय नमो ध्येयतमाय च।।
सप्तपातालपादाय सप्तद्वीपोरुजंघिने।
नमो दिग्बाहवे तुभ्यं व्योमदेहाय ते नमः।।
सोमसूर्याग्निनेत्राय ब्रह्मविद्यामदाम्भसे।
ब्रह्माण्डकुण्डपीठाय सामघोषस्वनाय च।।

ज्योतिर्मण्डलपुच्छाय हृदयालानकाय च।
ध्यानार्द्रबद्धपादाय पूजाधोरणधारिणे।।
सोमार्कबिम्बघण्टाय दिक्करीन्द्रवियोगिने।
आकाशसरसो मध्ये क्रीडागहनशालिने।।
सुमेरुदन्तकोशाय पृथिवीस्थलगाय च।
सुघोषाय सुभीमाय सुरकुञ्जरभेदिने।।
हेमाद्रिकूटभेत्रे च दैत्यदानवमर्दिने।
गजाकाराय देवाय गजराजाय ते नमः।।
ब्रह्मणे ब्रह्मरूपाय ब्रह्मगोत्रेऽव्ययाय च।
ब्रह्मघ्ने ब्राह्मणायैव ब्रह्मणः प्रियबन्धवे।।
यज्ञाय यज्ञगोत्रे च यज्ञानां फलदायिने।
यज्ञहर्त्रे यज्ञकर्त्रे सर्वयज्ञमयाय च।।
सर्वनेत्राधिवासाय सर्वैश्वर्यप्रदायिने।
गुहाशयाय गुह्याय योगिने ब्रह्मवादिने।।
"ॐ गंतत्पुरुषाय विद्महे, वक्रतुण्डाय धीमहि,
तन्नो दन्ती प्रचोदयात्"। 3।
एकाक्षरपरायैव मायिने ब्रह्मचारिणे।
भूतानां भुवनेशानां पतये पापहारिणे।।
सर्वारम्भनिहर्त्रे च विमुखानां निजार्चने।
नमो नमो गणेशाय विघ्नेशाय नमो नमः।।
विनायकाय वै तुभ्यं विकृताय नमोनमः।
नमस्तुभ्यं जगद्धात्रे नमस्तुभ्यं वियोगिने।।
नमस्तुभ्यं त्रिनेत्राय त्रिनेत्र प्रियसूनवे।

सप्तकोटि महामन्त्रै र्मन्त्रिता वयवाय ते।।
मन्त्राय मन्त्रिणां नित्यं मन्त्राणां फलदायिने।
लीलया लोकरक्षार्थं विभक्त निजमूर्तये।।
स्वयं शिवाय देवाय लोकक्षेमानु पालिने।
नमोनमः क्षमाभर्त्रे नमः क्षेमतमाय च।।
दयामयाय देवाय सर्वभूतदयालवे।
दयाकर दयारूप दयामूर्ते दयापर।।
दयाप्राप्य दयासार दयाकृतिरतात्मक।
जगतां तु दयाकर्त्रे सर्वकर्त्रे नमो नमः।।
नमः कारुण्यदेहाय वीराय शुभदन्तिने।
भक्तिगम्याय भक्तानां दुःखहर्त्रे नमोस्तु ते।।
त्रिपुरं दग्धुकामेन पूजिता त्रिशूलिना।
दयाशील दयाहार दयापर नमोस्तुते।।
नमः समस्तगीर्वाण वन्दिताङ्घ्रि युगाय ते।
जगतां तस्थुषां भर्त्रे विघ्नहर्त्रे नमोस्तुते।।
नमो नमस्ते गणनायकाय सुनायकाया खिलनायकाय।
विनायकाया भयदायकाय नमः शुभा नामु पनायकाय।।
गणाधिराजाय गणानुशास्त्रे गजाधिराजाय गजाननाय।
शताननायामितमाननाय नमो नमो दैत्यविनाशनाय।।
अनामयायामलधीमयाय स्वमाययाविष्ट जगन्मयाय।
अमेयमायाविकसन्मयाय नमो नमस्तेस्तु मनोमयाय।।
नमस्ते समस्ताधिनाथाय कर्त्रे नमस्ते समस्तोरुविस्तारभाजे।
नमस्ते समस्ताधिकायातिभूम्ने नमस्ते पुनर्व्यस्तविन्यस्तधाम्ने।।

पात्रे सुराणां प्रमथेश्वराणां शास्त्रेऽनुशास्त्रे सचराचरस्य।
नेत्रे प्रनेत्रे च शरीरभाजां धात्रे वराणां भवते नमोऽस्तु।।
नमोस्तु ते विघ्नविनाशकाय नमोस्तुते भक्तभयापहाय।
नमोस्तुते मुक्तमनस्थिताय नमश्च भूयो गणनायकाय।।
आखिलभूवनभर्त्रे सम्पदामेकदात्रे
निखिल तिमिर भेत्रे निष्कलायाव्ययाय।
प्रणतमनुज गोप्त्रे प्राणिनां त्राणकर्त्रे
सकलविबुधशास्त्रे विश्वनेत्रे नमोऽस्तु।।
दशनकुलिशभिन्नै निर्गतै र्दिग्गजानां
विलसितशुभदन्तं मौक्तिकैश्चन्द्रगौरैः।
भवनमुपसरन्तं प्रेक्ष्य गौरी भवन्तं
सुदृढमथ कराभ्यां ष्लिष्यते प्रेमनुन्ना।।
मृदुनि ललितशीते तल्परङ्गे भवान्याः
शुभविलसितभावां नृत्यलीलां विधाय।
अचल दुहितुरङ्कादऽङ्कमन्यं विसर्पन्
पितुरुपहरसि त्वं नृत्यहर्षोपहारम्।।
भुजगवलयितेनो पस्पृशन्पाणिना त्वां
सरभसमथ बाह्वोरन्तराले निवेश्य।
कलमधुरसुगीतं नृत्तमालोकयंस्ते
कलमऽविकलतालं चुम्बते हस्तपद्मे।।
कुवलयशतशीतैर्भूरिकल्हारहृद्यै
स्तव मुहुरपि गात्रस्पर्शनैः संप्रहृष्यन्।
क्षिपति च सुविशाले स्वाङ्कमध्ये भवन्तं

तव मुहुरनुरागान्मूर्ध्नि जिघ्रन्महेशः।।
बालो बालपराक्रमः सुरगणैः संप्रार्थ्यसेऽहर्निशं
गायन्किपुरुषाङ्गनाविरचितैः स्तोत्रै रभिष्टूयसे।
हाहाहूहुकतुम्बुरुप्रभृतिभिस्त्वं गीयसे नारद
स्तोत्रैरद्भुतचेष्टितैः प्रतिदिनं प्रोद्घोषते सामभिः।।
त्वां नमन्ति सुरसिद्धचारणाः
त्वां यजन्ति निखिला द्विजातयः।
त्वां पठन्ति मुनयः पुराविदः
त्वां स्मरन्ति यतयः सनातनाः।।
परं पुराणं गुणिनं महान्तं
हिरण्मयं पुरुषं योगगम्यम्।
यमामनन्त्यात्मभुवं मनीषिणो
विपश्चितं कविमप्यखयं च।।
गणानान्त्वां गणनाथ सुरेन्द्रं
कविं कवीनामतिमेध्यविग्रहम्।
ज्येष्ठराजमृषभं केतुमेकमा
नःश्रृण्वन्नूतिभिः सीद शश्वत्।
नमो नमोनन्तसुखैकदायिने
नमो नमोनन्तसुखैकसिन्धवे।।
नमो नमः शाश्वतशान्ति हेतवे
क्षमा दयापूरित चारु चेतसे।
गजेन्द्ररूपाय गणेश्वराय ते
परस्य पुंसः प्रथमाय सूनवे।।

नमो नमः कारणकारणाय ते
नमो नमो मङ्गलमङ्गलात्मने।
नमो नमो वेदविदां मनीषणाम्
उपासनीयाय नमो नमो नमः।

"श्रीईश्वर उवाच"।।

वैनायकं स्तवं पुण्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनम् आयुरारोग्यवर्धनम्।।
नृपाणां सततं रक्षा द्विजानां च विशेषतः।
स्तवराज इति ख्यातं सर्वसिद्धिकरं परम्।।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते।
रूपं वीर्यं बलं प्रज्ञां यशश्चायुः समन्वितम्।।
मनीषां सिद्धिमारोग्यं श्रियमप्यक्षयिष्णुताम्।
सर्वलोकाधिपत्यं च सर्वदेवाधिराजताम्।।
प्राप्याष्टगुणमैश्वर्यं प्राप्य भूतिं च शाश्वतीम्।
उद्धृत्या सप्तमं वंशं दुस्तराद्भवसागरात्।।
काञ्चनेन विमानेन शतनागायुतेन च।
विचरत्यखिलांल्लोकान्सशरीरो गणाधिपः।।
मत्प्रियश्च भवेन्मर्त्यः सर्वदेवप्रियः सदा।
प्रियो विनायकस्यापि प्रियोस्माकं विशेषतः।।
सङ्कल्पसिद्धः सर्वज्ञः सर्वभूतहिते रतः।
स्तवराजं जपन्मर्त्यः सुहृद्भिः सह मोदते।।
स्तवराज जपासक्त भावयुक्तस्य धीमतः।
अस्मिञ्जगत्त्रयेप्यस्ति नासाध्यं न च दुष्करम्।।

तस्मात्सर्वप्रयत्नेन स्तवराजं जपेन्नरः।
सकृज्जप्त्वा लभेन्मुक्तिं दुःस्वप्नेषु भयेष्वपि।।
सर्वं तरति पाप्मानं ब्रह्मभूतो भवेन्नरः।
तस्मात्संपूजितो ह्येष धर्मकामार्थसिद्धये।।
स्तवराजमिमं स्तवोत्तमं प्रलपंश्चैव पठन्स्मरन्नपि।
कुरुते शुभकर्म मानवः शुभमभ्येति शुभानि चाश्नुते।।
बहुनात्र किमुक्तेन स्तवराजमिमं जपन्।
सर्वं तद्भद्रमाप्नोति यद्यदिच्छति शाश्वतम्।।
स्तवानाम्प्यशेषाणां वरिष्ठोयं यतः स्तवः।
स्तवराज इति ख्यातिं सर्वलाकेषु यास्यति।।
श्रीनन्दिकेश्वर उवाच।।
इत्थमेष स्तवः प्रोक्तः प्रशस्तः शम्भुना स्वयम्।
सर्वसिद्धिकरो नृणां सर्वाभीष्टफलप्रदः।।
तस्मादनेन स्तोत्रेण स्तवराजेन मानवः।
स्तवञ्जपन्स्मरन्वापि कुर्वन्निर्वाणमृच्छति।।
एवं ते कथितं ह्येतत्क्रमेण परिपृच्छतः।
विनायकस्य माहात्म्यं प्रतिष्ठार्चनयोर्विधिः।।
प्रशंसा ब्रह्मगायत्र्याः कल्पस्तस्याच शोभनः।
उक्तमेत्परं ब्रह्म किं भूयः श्रोतुमिच्छसि।।
इति विरचयति स्म त्र्यम्बकः स्तोत्रमेतत्
वरमिभवदनस्य स्वामिनोऽत्यादरेण।
गुरुवरचरणाग्रान्मूर्ध्नि कृत्वा वराज्ञां
पठितमिह वरेण्यं घोरविघ्नौघशान्त्यै।।

लाक्षासिन्दूरवर्णं सुरवरनमितं मोदकैर्मोदितास्यं
हस्ते दन्तं ददानं दिन करसदृशं तेजसोग्रं त्रिनेत्रम्।
दक्षे रत्नाक्षसूत्रं वरपरशुधरं साखुसिंहासनस्थं
गाङ्गेयं रौद्रमूर्तिं त्रिपुरवधकरं विघ्नभक्षं नमामि।।
नमताशेषविघ्नौघ वारणं वारणाननम्।
कारणं सर्वसिद्धीनां दुरितार्णव तारणम्।।
शङ्कर जगदम्बिकयोरङ्के पङ्केन खेलन्तम्।
लम्बोदरमवलम्बे स्तम्भेर मराजचारुमुखम्।।

इति श्रीभविष्योत्तर उत्तरखण्डे नन्दिकेश्वरसंवादे गणेशस्तवराजः समाप्तः।।

गणेशस्तोत्रम्

ॐ लाक्षासिन्दूरवर्णं सुरवरनमितं मोदकैर्मोदितास्यं
हस्ते दन्तं ददानं हिमकरसदृशं तेजसोग्रं त्रिनेत्रम्।
दक्षे रत्नाक्षसूत्रं वरपरशुधरं साखसिंहासनस्थं
गांगेयं रौद्रमूर्तिं त्रिपुरवधकरं विघ्नभक्षं नमामि।।
गौरीपुत्रं त्रिनेत्रं गजमुखसहितं नागयज्ञोपवीतं
पद्माक्षं सर्वभक्षं सकलजनप्रियं सर्वगन्धर्वपूज्यम्।
संपूर्णं भालचन्द्रं वरदमतिबलं हन्तृकं चासुराणां
हेरम्बमादिदेवं गणपतिममलं सिद्धिदातारमीडे।।
यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशकाय।।
गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं

बृहदुदरमनन्तं दन्तमाले ददानम्।
परशुचषकपद्म द्वन्द्वहस्तारविन्दं
हरियुगलनिविष्टं श्रीगणेशं भजामि।।
अभयवरदपाणिं लडडुपात्रं सुदन्तं
नरपतिजपमालां नागपाशाङ्कशं च।
कनकमयविचित्रं मुद्गरं पाणिपद्मे
परशुमपि वहन्तं विघ्नराजं नमामि।।
विघ्नेशं विश्ववन्द्यं सुविपुलयशसं लोकरक्षाप्रदक्षं
साक्षात्सर्वापदासु प्रशमनसुमतिं पार्वतीप्राणसूनुम्।
प्रायः सर्वासुरेन्द्रैः ससुरमुनिगणैः साधकैः पूज्यमानं
कारुण्येनान्तरायामि भयशमनं विघ्नराजं नमामि।।
नमो नमो गजेन्द्राय एकदन्तधराय च।
नम ईश्वरपुत्राय गणेशाय नमो नमः।
माता यस्य उमादेवी पिता यस्य महेश्वरः।
मूषको वाहनं यस्य स नः पायाद्गणाधिपः।।
वन्दे वराभयपिनाककपालखङ्ग
खटवाङ्ग दन्तमुसलाब्जकरं त्रिनेत्रम्।
भीमं जटामुकुटिनं कमलासनस्थं
कश्मीरवासममलं गणराजमाद्यम्।।
रक्ताङ्गरागं परश्वक्षमाला
सुदन्तपाणिं सितलड्डुपात्रम्।
गजाननं सिंहरथाधिरूढं
गणेश्वरं विघ्नहरं नमामि।।

संसिद्ध्यर्थनमत्सुरासुरमिलं मौलिस्थितप्राल्ल सत्
सद्रत्नप्रभवप्रकृष्टविभव प्रेङ्खन्मयूखोज्जवलत्।
श्रेयो विघ्नमहाभयप्रशमने दिव्यं यदेकौषधं
भूयान्नो द्विरदाननाङ्घ्रिकमलद्वन्द्वं तदिष्टाप्तये।।
बिभ्रत्पञ्चमुखानि योयमुदितः स्वातन्त्र्यमात्रात्मना
शक्तेर्वैभवतः परप्रतिहतद्वैताख्यविघ्नव्ययः।
एकीभूतमुखः सकारणगणानुकारिणा तेजसा
देवः संप्रति भासतां मयि यथा तत्वं गणाधीश्वरः।।
हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसात्
आश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम्।
द्विचतुर्दशवर्णभूषिताङ्गं मुसलाम्भोजधरं महोपवीतम्।
द्विमृगाधिपगामिनं त्रिनेत्रं हरपुत्रं द्विरदाननं भजेऽहम्।।
जटामुकुटमण्डितं त्रिनयनं भजे षड्भुजं
सतीसरनिवासिनमसुरनाशनं लोहितम्।
वराभयपिनाकिनंत्वसिकपालभृच्छूलिनं
गणैर्वृतगणेश्वरं कमलगं च भीमाकृतिम्।।
गजाननं भूतगणाधि सेवितं
कपित्थजाम्बू फलसार भक्षणम्।
उमापतेः शोकविनाश कारणं
नमामि विश्वेश्वरमाशु सिद्धिदम्।।
लम्बोदरैकवदनः कमलासनस्थ
श्चन्द्रार्धमौलिरमलो भुजगेन्द्रहारः।
भीमोऽष्टबाहुरुदितार्कमरीचिरष्ट

सिद्धिप्रदो भवतु वाञ्छितसिद्धिदो नः।।
योऽभ्यर्चितः सुरगणैर्वरसिद्धिहेतो
श्छेत्तुं भयानि च करे परशुं दधानः।
देवः स शम्भुदयितापरिवर्धित श्रीः
र्विघ्नान्निवारयतु वारणराजवक्त्रः।।
श्रीगणेशाय नमः।।
विभ्रद्दक्षिणहस्तपद्मयुगले दन्ताक्षसूत्रे शुभे
वामे मोदकपूर्णपात्रपरशू नागोपवीती त्रिदृक्।
श्री मान्सिंहयुगासनः श्रुतियुगे शङ्खौ वहन्मौलिमा
न्दिश्यादीश्वरपुत्र एष भगवांल्लम्बोदरः शर्म नः।।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।।
अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः।।
गणानामधिपश्चण्डो गजवक्त्रस्त्रिलोचना।
प्रसन्नो भवतानित्यं वरदाता विनायकः।।
सुमुखश्चैक दन्तश्च कपिलो गजकर्णकः
लम्बोदरश्च विकटो विघ्नराजो विनायकः।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि गणेशस्य समाहितः।।
यः पठेत्तु शिवोक्तानि स लभेत्सिद्धिमुत्तमाम्।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
सङ्ग्रामे संकटे चैव विघ्नस्तस्य न जायते।।

ओं।। चिदचित्पदगम्भीरं गमागमपदोज्झितम्।
गहनाकाशसंकाशं वन्दे देवं गणेश्वरम्।।
श्री सनत्कुमार उवाच।।
शङ्कराब्रह्मणा प्राप्तं पद्मयोनेर्मया प्रभोः।
तदहं कीर्तयिष्यामि स्तोत्रं परमदुर्लभम्।।
षष्ठ्यां चतुर्थ्यामष्टम्यां चतुर्दश्यां च भक्तितः।
पूजयेच्च गणाध्यक्षं श्रद्धाभक्तिसमन्वितः।।
अर्घैः पुष्पैस्तथा धूपैर्दीपैर्माल्यैश्च चामरैः।
वस्त्रैः कुण्डलकेयूरैर्मौलिभिश्च वितानकैः।।
गङ्गाह्रदे तु गाङ्गेयं श्रीशैले तु गणेश्वरम्।
वाराणस्यां गजमुखं गयायां टङ्कधारिणम्।।
प्रयागे तु गणाध्यक्षं केदारे विकटाननम्।
लम्बोदरं कुरुक्षेत्रे नैमिषे च मदोत्कटम्।।
जम्बकं दण्डकारण्ये लोकेशं हिमवद्गिरौ।
विष्वक्सेनं च विन्ध्याद्रौ मलये हेमकुम्भकम्।।
नायकं पुष्करद्वीपे विघ्नेशं शल्मलौ स्थितम्।
इलावृते विश्वरूपं हरिवर्षे घटोदरम्।।
त्रिनेत्रं सिंहलद्वीपे श्वेतद्वीपे तु वामनम्।
उज्जयिन्यां तु लम्बोष्ठं मालवे शूर्पकर्णकम्।।
सौराष्ट्रे वरदं नित्यं काश्मीरे भीमरूपिणम्।
सिन्धुसागरयोर्मध्ये विज्ञेयं मन्त्रनायकम्।।
हर्यक्षं यक्षभवने कैलासे परमेश्वरम्।
महोदरं तु लुम्पायां चम्पायां शिखिवाहनम्।।

पाशहस्तं त्रिकूटेषु पूजयेत्सर्वसिद्धिदम्।
बलमग्निगुहायां तु पाटले सिंहवाहनम्।।
पौण्ड्रे रौद्रमुखं चापि कलापिग्रामके जयम्।
मेरुपृष्ठे कामरूपं नन्दनं नन्दने वने।।
विजयं वै गन्धवने देवदारुवने गणम्।
आर्तानां विघ्नहरणं गङ्गासागरसङ्गमे।।
महापथे विरूपाक्षं चित्रसेनं तु पुष्करे।
दुर्जयं यमुनातीरे स्तम्भनं गन्धमादने।।
अम्बरीषं भद्रवटे मोहनं हस्तिनःपुरे।
किष्किन्धायामुग्रकेतुं लङ्कायां तु विभीषणम्।।
कलिङ्गे वरुणं चैव विन्ध्यपादे मदोत्कटम्।
अश्वत्थं च तुरुष्केषु चीनेषु त्रिशिखायुधम्।।
वज्रहस्तं कोसलेषु दाक्षिणात्येषु लोहितम्।
शूलोद्धतकरं चैव मध्यदेशे प्रकीर्तितम्।।
एकदंष्ट्रं पश्चिमाद्रौ पूर्वदेशेऽपराजितम्।
उत्तरे चारुवक्रं च वरिष्ठं त्रिपुरेषु च।।
हिरण्यकवचं चैव गिरिसन्धिषु संस्थितम्।
सुमुखं नागरन्ध्रेषु नर्मदायां च षड्भुजम्।।
मायापुर्याम हामायं भद्रकर्णह्रदे शिवम्।
गोकर्णे गजकर्णं च कान्यकुब्जे वराननम्।।
पद्मासनं कामरूपे श्रीमुखं सर्वतः स्थितम्।
वेदवेदाङ्गशास्त्रेषु चिन्तयेद्गणनायकम्।।
अष्टाषष्टिस्तु नामानि स्तुतान्यद्भुतकर्मणः।

नित्यं प्रभातकाले तु चिन्तयेत्सर्वसिद्धिदम्।।
एतत्स्तोत्रं पवित्रं तु मङ्गलं पापनाशनम्।
शस्त्रखर्खोद वेताल यक्षरक्षो भयापहम्।।
चौरारण्य भयव्याघ्र व्याधिदुर्भिक्ष नाशनम्।
कृत्यादिमायाशमनं सर्वशत्रुविमर्दनम्।।
त्रिसन्ध्यं यः पठेदेतत्स भवेत्सर्वसिद्धिभा।
गणेश्वरप्रसादेन लभते शाङ्करं पदम्।।

आरती गणेश जी

जय गणेश, जय गणेश, जय गणेश देवा।
माता जाकी पार्वती, पिता महादेवा।।
एक दंत दयावंत, चार भुजा धरी।
मस्तक पर सन्दूर सोहे, मूसे की सवारी।।
जय गणेश, जय गणेश, जय गणेश देवा।
माता जाकी पार्वती, पिता महादेवा।।
अंधन को आंख देत, कोढ़िन को काया।
बांझन को पुत्र देत निर्धन को माया।
जय गणेश, जय गणेश, जय गणेश देवा।
माता जाकी पार्वती, पिता महादेवा।।
हार चढ़े, फूल चढ़े और चढ़े मेवा।
लड्डुअन का भोग लगे, संत करे सेवा।।
जय गणेश, जय गणेश, जय गणेश देवा।
माता जाकी पार्वती, पिता महादेवा।।

शंकर पूजन

भगवान् शंकर पर जल चढ़ाते हुए पढ़ेः-

असंख्याताः सहस्राणि ये रुद्रा अधि-भूम्याम्।
तेषां सहस्रयोजनेव धन्वानि तन्मसि ।
यो रुद्रो अग्नौ य अप्सु य औषधीषु यो वनस्पतिषु। यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ।भवायदेवाय शर्वायदेवाय रुद्रायदेवाय पशुपतयेदेवाय उग्रायदेवाय महादेवाय भीमायदेवाय ईशानायदेवाय पार्वती-सहिताय परमेश्वराय जलं समर्पयामि नमः।

नेत्र स्पर्श करते हुए पढ़ेंः- तेजोरूप ! महेशान ! सोमसूर्याग्निलोचन प्रकाशय परंतेजो नेत्रस्पर्शेन शंकर ! भवायदेवाय उमा-सहिताय शिवाय पार्वती-सहिताय परमेश्वराय नेत्रस्पर्शं परिगृहणामि नमः।

तिलक लगाते हुये पढ़ेंः- सर्वेश्वर जगद्वन्द्य दिव्यासन सुसंस्थित। गन्धं गृहाण देवेश दिव्यगन्धोप शोभितम्। भवाय देवाय उमा-सहिताय शिवाय पार्वती-सहिताय परमेश्वराय समालभनं गन्धो नमः। ठाकुर

फूल चढ़ाते हुए पढ़ेंः- सदाशिव शिवानन्द प्रधान करणेश्वर। पुष्पाणि बिल्वपत्राणि गृहाण मे। भवाय देवाय उमा सहिताय शिवाय पार्वती सहिताय परमेश्वराय

पुष्पं समर्पयामि नमः।

रत्नदीप कपूर चढ़ाते हुए पढें:- हिरण्यबाहो सेनानीः औषधीनां पते शिव। दीपं गृहाण कर्पूर कपिलाज्य त्रिवर्तिकम्। भवाय देवाय उमा-सहिताय शिवाय पार्वती-सहिताय परमेश्वराय रत्नदीपं कर्पूरं परिकल्पयामि नमः।

दोनों हाथों में पुष्पांजलि पकड़ते हुए निम्नलिखित तीन श्लोक पढ़कर फूल चढ़ावें-

आत्मा त्वं गिरिजामतिः सहचराः प्राणः शरीरं गृहं,
पूजा ते विषयोपभोगरचना निद्रा समाधि स्थितिः।
संचारः पदयोः प्रदक्षिणविधि स्तोत्राणि सर्वा गिरो,
यत् यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।
पुष्पाणि सन्तु तव देव ममेन्द्रियाणि,
धूपो गुरु र्वपुरिदं हृदयं प्रदीपः।
प्राणान् हविषि करणानि नवाक्षतानि,
पूजाफलं व्रजतु साम्प्रतमेष जीवः ।।2।।
जन्मानि सन्तु मम देव शताधिकानि,
माया च मे विशतु चित्तमऽबोध हेतु।
किन्तु क्षणार्धमपि त्वच्चरणारबिन्दात्,
मा पैतु मे हृदयमीश नमो नमस्ते ।।3।।

अभिनवगुप्त कृत शिवस्तुतिः

ॐ व्याप्त-चराचर-भाव-विशेषं,
चिन्मयम्- एकम्-अनन्तम्-अनादिम्।
भैर-व-नाथम्-अनाथ-शरण्यम्-

तन्मय-चित्ततया-हृदि वन्दे ।।1।।
त्वन्मयम्-एतत्-अशेषम्-इदानीं,
भाति मम त्वत्-अनुग्रह शक्त्या,
त्वं च महेश सदैव ममात्मा,
स्वात्ममयं मम तेन समस्तम् ।।2।।
स्वात्मनि-विश्वगते त्वयि नाथे,
तेन न संसृति-भीतेः कथास्ति।
सत्-स्वपि दुर्धर-दुःख विमोह,
त्रास-विधायिषु कर्म-गणेषु ।।3।।
अन्तक मां प्रति मा दृशम्-एनां,
क्रोध-कराल-तमां विदधीहि।
शंकर-सेवन-चिन्तन-धीरो,
भीषण-भैरव-शक्ति-मयोस्मि।।4।।
इत्थम्-उपोढ-भवन्मय-संवित्,
दीधिति-दारित- भूरि-तमिस्रः।
मृत्यु-यमान्तक कर्म-पिशाचैः,
नाथ ! नमोस्तु न जातु बिभेमि ।।5।।
प्रोदित-सत्य-विबोध-मरीचि,
प्रोक्षित-विश्व- पदार्थ-सतत्वः।
भाव-परामृत-निर्भरपूर्णे,
त्वय्यहम्-आत्मनि निर्वृतिम्-एमि ।।6।।
मानस-गोचरम्-एति-यदैव,
क्लेश-तनु-ताप- विधात्री।
नाथ ! तदैव मम-त्वत्-अभेद,
स्तोत्र-परामृत-वृष्टिर्-उदेति ।।7।।

शंकर ! सत्यम्-इदं व्रत-दान,
स्नान-तपो-भव- ताप-विनाशि।
तावक-शास्त्र-परामृत-चिन्ता,
सिध्यति चेतसि-निर्वृति-धारा।।8।।
नृत्यति गायति हृष्यति गाढं,
संवित्-इयं मम भैरवनाथ।
त्वां प्रियं आप्य सुदर्शनम्-एकं,
दुर्लभम्-अन्यजनैः समयज्ञम्।।9।।
वसु-रस-पौषे कृष्ण-दशम्यां,
अभिनव-गुप्तः स्तवम्-इमम्-अकरोत्।
येन विभु-भव-मरु-सन्तापं,
शमयति झटिति जनस्य दयालुः ।।10।।

शिव संकल्प (यजुर्वेद से)

यत्-जाग्रतो-दूरम्-उदेति दैवं,
तदु सुप्तस्य तथैव्-ऐति।
दूरं-गमं ज्योतिषां ज्योतिर्-एकं,
तन्मे मनः शिव-संकल्पम्-अस्तु ।।1।।
येन कर्मा-ण्यपसो मनीषिणो,
यज्ञे कृण्वन्ति विदथेषु धीराः।
यत्-अपूर्वं यक्षम्-अन्तः प्रजानां,
तन्मे मनः शिव संकल्पम्-अस्तु ।।2।।
यत्-प्रज्ञानम्-उत चेतो धृतिश्च,
यत्-ज्योतिर्-अन्तर्-अमृतं प्रजासु।

यस्मात्-न ऋते किंचन कर्म क्रियते,
तन्मे मनः शिवसंकल्पम्-अस्तु ।।3।।
येनेदं भूतं भुवनं भविष्यत्,
परिगृहीतम्-अमृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता,
तन्मे मनः शिव-संकल्पम्-अस्तु ।।4।।
यस्मिन्-ऋचः साम यजूँषि यस्मिन्,
प्रतिष्ठिता-रथनाभौ-इवाराः।
यस्मिन्-चितं सर्वम्-ओतं प्रजानां,
तन्मे मनः शिव-संकल्पम्-अस्तु ।।5।।
सुषा-रथिर्-अश्वान्-इव यन्मनुष्यान्,
नेनीयते-अभीशुभिर्-वाजिनः इव।
हृत्प्रतिष्ठं यत्-अजिरं जविष्ठं,
तन्मे मनः शिव-संकल्पम्-अस्तु ।।6।।

शिवाष्टकम्

शीतांशु-शुभ्र कलया कलितो-त्तमाङ्गं,
ध्यान स्थितं धरणिभृत्-तनयार्चितं तम्।
काला-नलोप-महला हल-कृष्ण कण्ठं,
श्री शंकरं कलिमलापहरं नमामि।।
गायन्ति यस्य चरितानि महात्-भुतानि,
पद्मोद्-भवोद्-भवमुखाः सततं मुनीन्द्राः।
ध्यायन्ति यं यमिनम्-इन्दु-कलावतं सं,

सन्तः समाधि-निरतास्तम् अहं नमामि।।
त्रैलोक्यम्-एतत्-अखिलं ससुरासुरंच,
भस्मीभवेत्-यदि न यो दययार्द्र देहः।
पीत्वाऽहरद्गरलम्-आशु भयं तदुत्थं,
विश्वा-वनैक-निरताय-नमोस्तु-तस्मै।।
नो शक्यम्-उग्र तपसापि युगान्तरेण,
प्राप्तुं यद्-अन्य सुर पुङ्गवतस्तदेव।
भक्त्या सकृत्प्रणम्-अनेन-सदा-ददाति,
यो नौमि नम्रशिरसा च तमाशुतोषम्।।
भूति प्रियोऽपि वितरत्यनिशं विभूतिं,
भक्ताय यः फणिगणानपि धारयन् सन्।
हन्ति प्रचण्ड भव भीम भुजङ्ग भीतिं,
तस्मै नमोस्तु सततं मम शंकराय।।
येषां भयेन विबुधा रजनी चराणां,
नो तत्यजुर्हिम-महीध्र-गुहा गृहाणि।
हत्वा ददौ गिरिश तानपि शैव धाम,
त्वत्तः परोऽस्ति परमेश्वर को दयालुः।।
पाप प्रसाधनरता दितिजा अपीन्द्रं,
सद्यो विजित्य सुरधाम-धराधिपत्यम्।
यस्य प्रसादलवलेश-वशादवाप्ताः,
तस्मै ममास्तु विनतिः परमेश्वराय।।
अर्चा कृता न तव नाम हर स्मृतन्न,
नो भक्तवत्सल कृतं तव किंचिदन्यत्।

वीक्ष्य स्वपादकमलोपनतं तथापि,
मामू पाहि कारुणिक-मौलिमणे महेश।।

शंकर प्रार्थना

प्रणतोस्मि महादेव, प्रपन्नोस्मि सदाशिव,
निवारय महामृत्युं, मृत्युंजय नमोस्तुते।
मृत्युंजय महादेव, पाहि मां शरणागतम्,
जन्ममृत्यु-जरारोगैः, पीडितं भवबन्धनात्।।
कर्पूर-गौरं करुणावतारं,
संसार-सारं भुजगेन्द्र-हारम्।
सदा रमन्तं हृदयारबिन्दं,
भवं भवानी सहितं नमामि।।
हर शम्भो महादेव, विश्वेशामरवल्लभ।
शिव शंकर सर्वात्मन्, नीलकण्ठ नमोस्तुते।
तव तत्त्वं न जानामि, कीदृशोसि महेश्वर,
यादृशोसि महादेव, तादृशाय नमो नमः।।
आधीनाम्-अगदं दिव्यं, व्याधीनां मूलकृन्तनम्,
उपद्रवाणां दलनं, महादेवम्-उपास्महे।
आत्मा त्वं गिरजा मतिः, परिजनाः प्राणाः शरीरं गृहं ।
पूजा ते विषयो-पभोगरचना निद्रा समाधि स्थितिः।
संचारोऽपि परिक्रमः पशुपते, स्तोत्राणि सर्वा गिरो।
यत्यत् कर्म करोमि देव भगवन् तत् तत् तवाराधनम्।।

लिंगाष्टकम्

ब्रह्मा मुरारिः सुरार्चित लिंगं,
निर्मल-भासित-शोभित-लिंगम्।
जन्मज-दुःख-विनाशक-लिंगं,
तत्प्रणमामि सदा शिव-लिंगम् ।।1।।
देव-मुनि-प्रवरा-र्चितलिंगं,
कामदहं करुणाकर-लिंगम्।
रावण-दर्प-विनाशित-लिंगं,
तत्प्रणमामि सदाशिवलिंगम् ।।2।।
सर्व-सुगन्धि सुलेपित-लिंगं,
बुद्धिविवर्धन-कारण-लिंगम्।
सिद्ध-सुरासर-वंदित-लिंगं,
तत्प्रणमामि सदाशिव-लिंगम् ।।3।।
कनक-महामणि-भूषित-लिंगं,
फणिपति-वेष्टित-शोभित-लिंगम्।
दक्ष-सुयज्ञ-विनाशक लिंगं,
तत्प्रणमामि सदाशिव-लिंगम् ।।4।।
कुंकम-चंदन-लेपितलिंगं,
पंकज-हार-सुशोभित-लिंगम्।
संचित-पाप-विनाशन-लिंगं,
तत्प्रणमामि-सदाशिव लिंगम् ।।5।।
देव-गणार्चित सेवित लिंगम्,
भावेर्भक्तिभिरेव च लिंगम्।

दिन-कर-कोटि-प्रभा-कर लिंगम्,
तत्प्रणमामि सदाशिव लिंगम् ।।6।।
अष्ट-दलोपरि वेष्टित-लिंगं,
सर्व-समुद्-भव-कारण-लिंगम्।
अष्ट-दरिद्र-विनाशित-लिंगम्,
तत्प्रणमामि सदाशिवलिंगम् ।।7।।
सुरगुरु-सुरवर-पूजित-लिंगम्,
सुरवन-पुष्प-सदा-र्चित-लिंगम्।
परात्परं-परमात्मक-लिंगम्,
तत्प्रणमामि सदाशिव-लिंगम् ।।8।।

शिवोऽहं शिवोऽहं

मनो बुद्धय-हंकार-चित्तानि नाहं,
न च श्रोत्र-जिह्वे न च घ्राण-नेत्रे।
न च व्योम-भूमि-र्न तेजो न वायुः,
चिदानन्द-रूपः शिवोऽहं शिवोऽहं।
न च प्राण-संज्ञो न वै पंचवायुः,
न-वा सप्त-धतु-र्न वा पंचकोशः।
न वाक्-पाणिपादं न चोपस्थ-पायुः,
चिदानन्द-रूपः शिवोऽहं शिवोऽहम्।
न मे द्वेषरागौ न मे लोभ मोहौ,
मदो नैव मे नैव मात्सर्य-भावः।
न धर्मो न चार्थो न कामो न मोक्षः,
चिदानन्द रूपः शिवोऽहं शिवोहम्।

न पुण्यं न पापं न सौख्यं न दुःखं,
न मन्त्रो न तीर्थं न वेदा न यज्ञः।
अहं भोजनं नैव भोज्यं न भोक्ता,
चिदानन्दरूपः शिवोऽहं शिवोऽहम्।
न मृत्यु-र्न शंका न मे जातिभेदः,
पिता नैव मे नैव माता च जन्म।
न बन्धु-र्न मित्रं गुरु-नैव शिष्यः
चिदानन्दरूपः शिवोऽहं शिवोऽहम्।
अहं निर्विकल्पी निराकाररूपो,
लघुत्वात्-च सर्वत्र सर्वेन्द्रियाणाम्।
न चा संगतं नैव मुक्ति-र्न मेयः,
चिदानन्दरूपः शिवोऽहं शिवोऽहम्

शिवपञ्चाक्षरस्तोत्रम्

नागेन्द्र हाराय त्रिलोचनाय,
भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय,
तस्मै 'न'काराय नमः शिवाय।1।
मन्दाकिनी-सलिल-चन्दन-चर्चिताय,
नन्दीश्वर-प्रमथनाथ-महेश्वराय।
मन्दारपुष्प-बहुपुष्प-सुपूजिताय,
तस्मै 'म'काराय नमः शिवाय।2।
शिवाय-गौरी-वन्दनाब्ज-वृन्द,
सूर्याय-दक्षाऽध्वर-नाशकाय।

श्रीनीकलण्ठाय वृषध्वजाय,

तस्मै 'शि'काराय नमः शिवाय।3।

वसिष्ठ-कुम्भोद्भव-गौतमार्य,

मुनीन्द्र-देवाऽर्चित-शेखराय।

चन्द्रार्क-वैश्वानर-लोचनाय,

तस्मै 'व'काराय नमः शिवाय।4।

यक्षस्वरूपाय जटाधराय,

पिनाकहस्ताय सनातनाय।

दिव्याय देवाय दिगम्बराय,

तस्मै 'य'काराय नमः शिवाय।5।

पंचाक्षरम्-इदिं पुण्यं यः पठेत्-शिव-सन्निधौ।

शिवलोकम्-अवाप्नोति-शिवेन-सह-मोदते।।

शिव षडक्षरस्तोत्रम्

ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः।

कामदं मोक्षदं चैव ॐकाराय नमो नमः।1।

नमन्ति ऋषयो देवा, नमन्ति-अप्सरसां गणाः।

नरा नमन्ति देवेश 'न'काराय नमो नमः।2।

महादेवं महात्मानं महाध्यानं परायणम्।

महापापहरं देवं 'म'काराय नमो नमः।3।

शिवं-शान्तं-जगन्नाथं, लोका-नुग्रह-कारकम्।

शिवमेकपदं नित्यं 'शि'काराय नमो नमः।4।

वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम्।
वामे शक्तिधरं देवं 'व'काराय नमो नमः।5।
यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः।
यो गुरुः सर्वदेवानां 'य'काराय नमो नमः।6।
षड्-अक्षरं-इदं-स्तोत्रं-यः-पठेत्-शिव-सन्निधौ।
शिव-लोकं-अवाप्नोति, शिवेन-सह-मोदते।7।

श्री रुद्राष्टकम्

नमामि-ईशं-ईशान-निर्वाण-रूपं,
विभुं-व्यापकं-ब्रह्म-वेद-स्वरूपम्।
अजं-र्निगुणं-निर्विकल्पं-निरीहं,
चिदा-कारम्-आकाशवासं-भजेऽहम्।।
निराकारं-ओंकार-मूलं-तुरीयं,
गिरा-ज्ञान-गोतीतं-ईशं-गिरीशम्।
रालं-महाकाल-कालं-कृपालं,
गुणा-गार-संसार-पारं-नतोऽहम्।।
तुषाराद्रि-सङ्काश-गौरं-गम्भीरं,
मनो-भूत-कोटि-प्रभाश्री-शरीरम्।
स्फुरन्-मौलि-कल्लोलिनी-चारु-गङ्गा,
लसत्-भाल-बालेन्दु-कण्ठे-भुजङ्गा।।
चलत्-कुण्डलं-भ्रू सुनेत्रं-विशालं

प्रसन्नाननं- नीलकण्ठं-दयालम्।
मृगाधीश-चर्माम्बर-मुण्डमालं,
प्रियं-शङ्करं-सर्वनाथं-भजामि।।
प्रचण्डं-प्रकृष्टं-प्रगल्भं-परेशं,
अखण्डं-अजं-भानु-कोटि-प्रकाशम्।
यः-शूल-निर्मूलनं-शूल-पाणिं,
भजेऽहं-भवानीपतिं-भाव-गम्यम्।।
कलातीत-कल्याण-कल्पान्त-कारी,
सदा-सज्जना-नन्ददाता-पुरारिः।
चिदानन्द-सन्दोह-मोहाप-हारी,
प्रसीद-प्रसीद-प्रभो-मन्मथारिः।।
न-यावत्-उमानाथ-पादार-विन्दं,
भजन्तीह-लोके-परे-वा-नराणाम्।
न-तावत्-सुखं-शान्ति-सन्ताप-नाशं,
प्रसीद-प्रभो-सर्व-भूताधिवासं।।
न जानामि-योगं-जपं-नैव-पूजां,
नतोऽहं-सदा-सर्वदा-देव-तुभ्यम्।
जरा-जन्म दुखौघ तातप्यमानं,
प्रभो-पाहि-शापात्-नमामीश-शम्भो।।
रुद्राष्टकं-इदं प्रोक्तं, विप्रेण हर तुष्टये।
ये पठन्ति नरा-भक्त्या, तेषां शम्भुः प्रसीदति।।

शिव स्तुतिः

असित गिरि समं स्यात् कज्जलं सिन्धुपात्रे,
सुरतरुवर-शाखा-लेखिनी-पत्रम्-ऊर्वी।
लिखति यदि गृहीत्वा शारदा सर्व कालं,
तदपि तव गुणानाम् ईश पारं न याति।।
वन्दे देवम् उमापतिं सुरगुरुं, वन्दे जगत् कारणम्,
वन्दे पन्नगभूषणं मृगधरं, वन्दे पशूनाम् पतिम्।
वन्दे सूर्य्यशशांक-वह्नि नयनम्-वन्दे मुकुन्द-प्रियम्।
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्।
शान्तं पद्मासनस्थं शशधर-मुकुटं, च वक्त्रं त्रिनेत्रं,
शूलं वज्रं च खड्गपरशुमभयदं, दक्षिणाङ्गे वहन्तम्।
नागं पाशं च घण्टां डमरुक सहितं, सां कुशं वामभागे,
नानालंकार युक्तं स्फटिक-मणिनिभं, पार्वतीशं नमामि।
श्मशानेष्वा क्रीडा स्मरहर पिशाचाः सहचराः,
चिताभस्मालेपः स्त्रगपि नृकरोटी परिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवम् अखिलम्,
तथापि स्मर्तृणां वरद परमं मङ्गलमसि।
पापोऽहं पाप कर्माहं पापात्मा पाप सम्भवः,
त्राहि मां पार्वती नाथ सर्व पाप हरो भव।

शिव–चामर–स्तुतिः

ॐ अतिभीषण कटुभाषण यमकिङ्कर पटली,
कृत-ताडन-परिपीडन-मरणागम-समये।

उमया सह मम चेतसि यमशासन निवसन्,

शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्।।1।।

अतिदुर्नय चटुलेन्द्रिय रिपु-सञ्चय दलिते,

पविकर्कश कटुजल्पित खलगर्हण-चलिते।

शिवया सह ममचेतसि शशिशेखर निवसन्,

शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्।

भव भञ्जन सुर-रञ्जन खलवञ्चन पुरहन्,

दनुजान्तक मदनान्तक रतिजान्तक भगवन्।

गिरिजावर करुणाकर परमेश्वर भयहन्,

शिवशङ्कर शिव शङ्कर हर मे हर दुरितम्।

शक्रशासन कृतशासन चतुराश्रम विषये,

कलिविग्रह भवदुर्ग्रह रिपुदुर्बल समये।

द्विज-क्षत्रिय-वनिता शिशुदर कम्पित हृदये,

शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्।

भवसम्भव विविधामय परिपीडित वपुषं,

दयितात्मज ममताभर-कलुषी-कृत-हृदयम्।

करु मां निजचरणार्चन निरतं भव सततं,

शिवशङ्कर शिवशङ्कर हर मे हर दुरितम्।

शिवाय नमः ओं नमः शिवाय

आधार ज़गतुक कुनुय छु मन्त्र,

शिवाय नमः ओं नमः शिवाये।।

त्रिपंच नयनो ही आदि दीवो,

जटा मुकट छुय गंडिथ च्य़् दीवो।

चन्द्र-अर्द्ध शेखर, त्रिलोचनाय,
शिवाय नमः ओं, नमः शिवाय।।
च्य् नील कंठो जटन छय-गंगा,
च मोक्षदायक गुसोज्य नंगा।
अलक्ष अगोचर छ्यपन गुफाये,
शिवाय नमः ओं नमः शिवाये।।
